सव्यसाची सुभद्रेशः शब्दभेदी कपिध्वजः ।
वानरेन्द्रध्वजोऽपि बीभत्सुः ॥” इति त्रिकाण्डशेषः ॥
अपि च ।
“अर्ज्जुनः फाल्गुनः पार्थः सव्यसाची धनञ्जयः ।
राधावेधी किरीटीन्द्रो जिष्णुः श्वेतहयो नरः ।
बृहन्नलो गुडाकेशः सुभद्रेशः कपिध्वजः ।
बीभत्सुः कर्णजित्तस्य गाण्डीवं गाण्डिवं धनुः ॥”
इति हेमचन्द्रः ॥

बृहन्नला,स्त्री, अर्ज्जुनः । इति मेदिनी ॥ द्वादशवर्ष-वनवासानन्तरमज्ञातवासे विराटभवने विराट-कन्यायां नृत्यगीतादिशिक्षार्थं स्त्रीक्लीववेशे-नार्ज्जुनो बृहन्नलेति नाम्ना ख्यातोऽभूत् । यथा,

अर्ज्जुन उवाच ।

“गायामि नृत्याम्यथ वादयामि
भद्रोऽस्मि नृत्ये कुशलोऽस्मि गीते ।
त्वमुत्तरायै प्रदिशस्व मां स्वयं
भवामि देव्या नरदेव ! नर्त्तकः ॥
इदन्तु रूपं मम येन किन्तव
प्रकीर्त्तयित्वा भृशशोकवर्द्धनम् ।
बृहन्नलां मां नरदेव विद्धि
सुतं सुतां वा पितृमातृवर्जिताम् ॥

विराट उवाच ।

ददामि ते हन्त वरं बृहन्नले
सुताञ्च मे नर्त्तय याश्च तादृशीः ॥”
इति महाभारते विराटपर्व्व ॥

बृ(ह)स्पतिः, पुं, ( बृहतां वाचां पतिः । “पार-स्करेति ।”६ । १।१५७ । इति सुट् निपात्यते ।) अङ्गिरसः पुत्त्रः । स च देवानां गुरुः धर्म्मशास्त्र-प्रयोजकः नवग्रहमध्ये पञ्चमग्रहश्च । तत्-पर्य्यायः । सुराचार्य्यः २ गीष्पतिः ३ धिषणः ४ गुरुः ५ जीवः ६ आङ्गिरसः ७ वाचस्पतिः ८ चित्रशिखण्डिजः ९ । इत्यमरः ॥ उतथ्या-नुजः १० गोविन्दः ११ चारुः १२ द्वादश-रश्मिः १३ गिरीशः १४ दिदिवः १५ पूर्व्व-फल्गुनीभवः १६ । इति जटाधरः ॥ सुरगुरुः १७ वाक्पतिः १८ वचसांपतिः १९ इज्यः २० देवेज्यः २१ बृहताम्पतिः २२ इज्यः २३ वागीशः २४ पथाः २५ दीदिविः २६ द्वादश-करः २७ प्राक्फाल्गुनः २८ गीरथः २९ । इति शब्दरत्नावली ॥ स च पीतवर्णः । ईशान-कोणपुरवशाकजातिरूप वेदसत्त्वगुण-मधुर-रसधतुर्मीनराशिपुष्यनक्षत्रपुष्परागमणि-सिन्धुदेशानां अधिपतिः । षड्गुलशरीरः । पद्मस्थः । चतुर्भुजः । अक्षवरकमण्डलुदण्डधारी । अस्याधिदेवता ब्रह्मा । प्रत्यधिदेवता इन्द्रः । स तु सूर्य्यास्यः । अङ्गिरोमुनिपुत्त्रः । प्रातःकाले प्रबलः । शुभग्रहः । देवग्रहस्वामी । हृद्धः । रक्तहृदयस्वामी । वातपित्तकफात्मकः । वणिक्-कर्म्मकर्त्ता । अङ्गिरोगोत्रः । इति ग्रहयाग-तत्त्वादयः । * । तद्वारजातफलम् ।

“नृपेन्द्रमन्त्री नृपलब्धकामो
विद्याविनोदी चतुरः प्रगल्भः ।
आचार्य्यपूज्यो मधुरस्वभावो
वारे भवेद्देवगुरोर्मनुष्यः ॥”
इति कोष्ठीप्रदीपः ॥ * ॥

स च शिवस्य गुरुपुत्त्रः यथा,—

महेन्द्र उवाच ।

“कथं वा देवकर्त्तुश्च सिद्धानां योगिनां गुरोः ।
मृत्युञ्जयस्य शम्भोश्च गुरुपुत्त्रो बृहस्पतिः ।
ततो ज्ञानी महादेवः कथं शिष्यो गुरोः पितुः ॥

ब्रह्मोवाच ।

कथेयमतिगुप्ता च पुराणेषु पुरन्दर ।
इमां पुरा प्रवृत्तिञ्च कथयामि निशामय ॥
मृतवत्सा कर्म्मदोषाद्भार्य्या अङ्गिरसः पुरा ।
व्रतं चकार महाक्षयात् कृष्णस्य परमात्मनः ॥
व्रतं पुंसवनं नाम वर्षैकं चकार सा ।
सनत्कुमारो भगवान् कारयामास तां व्रतम् ॥
स्वेच्छामयः परं ब्रह्म भक्तानुग्रहविग्रहः ।
तदागत्य च गोलोकात् परमात्मा कृपामयः ॥
स व्रतानशनक्षीणां तामुवाच कृपानिधिः ।
प्रणतां साश्रुनेत्राञ्च विनीताञ्च तया स्तुतः ॥

श्रीकृष्ण उवाच ।

गृहाणेदं यज्ञफलं मम तेजःसमन्वितम् ।
भुङ्क्ष्व मदरपुत्त्रस्ते भविष्यति मदंशतः ॥
पतिर्गुरुश्च देवानां बृहतां ज्ञानिनां वरः ।
पुत्त्रस्ते भविता साध्वि ! मद्वरेण भविष्यति ॥
मद्वरेण भवेद्यो हि स च मद्वरपुत्त्रकः ।
त्वद्गर्भे मम पुत्त्रोऽयं चिरजीवी भविष्यति ॥
वरजो वीर्य्यजश्चैव क्षेत्रजः पालकस्तथा ।
विद्यामन्त्रसुतानाञ्च गृहीतः सप्तमः सुतः ॥
इत्युक्त्वा राधिकानाथः स्वर्लोकञ्च ययौ पुरा ।
श्रीकृष्णवरपुत्त्रोऽयं ज्ञानी सुरगुरुः स्वयम् ॥
मृत्युञ्जयं महाज्ञानं शिवाय प्रददौ पुरा ।
दिव्यं वर्षत्रिलक्षञ्च तपःकर्त्ते हिमालये ॥
सुयोगज्ञानममलं तेजः स्वात्मा समं परम् ।
स्वशक्तिविष्णुमायाञ्च स्वांशञ्च वाहनं वृषम् ॥
स्वशूलञ्च स्वकवचं स्वमन्त्रं द्वादशाक्षरम् ।
कृपामयः स्तुतस्तेन श्रीकृष्णश्च परात्परः ॥
शिवलोके शिवा सा च विष्णुमाया शिव-
प्रिया ।
शक्तिर्नारायणस्येयं तेन नारायणी स्मृता ॥
तेजःसु सर्व्वदेवानां साविर्भूता सनातनी ।
जघान दैत्यनिकरं देवेभ्यः प्रददौ पदम् ॥
कल्पान्ते दक्षकन्या च सा मूलप्रकृतिः सती ।
पितृयज्ञे तनुं त्यक्त्वा योगेन सिद्धयोगिनी ॥
बभूव शैलकन्या सा साध्वी च भर्त्तृनिन्दया ।
कालेन कृष्णतपसा शङ्करं प्राप शङ्करी ॥
श्रीकृष्णो हि गुरुः शम्भोः परमात्मा परात्परः ।
कृष्णस्य वरपुत्त्रोऽयं स्वयमेव बृहस्पतिः ।
अतो हेतोः सुरगुरुर्गुरुपुत्त्रः शिवस्य च ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५६ अध्यायः ॥
(पुरोहितः । मन्त्रपालके तु त्रि । यथा, ऋग्वेदे ।
४ । ५० । ७ ।
“बृहस्पतिं यः सुभृतं बिभर्त्ति ॥”
“बृहस्पतिं बृहतां महतां मन्त्राणां पालयितारं देवं उत्तमपत्यं पुरोहितं वा ।” इति तद्भाष्ये सायणः ॥ )

बृ(ह)स्पतिचक्रं, क्ली, ( बृहस्पतेः चक्रम् । ) नृणां शुभाशुभज्ञानार्थं बृहस्पतिसञ्चारकालीन-अश्विन्यादिसप्तविंशतिनक्षत्रयुक्तनराकारचक्रम् । यथा,—

“शीर्षे चत्वारि राज्यं जलधिरपि करे दक्षिणे चापि सौख्यं
चैकं कण्ठे विभूतिं मदनशरमितं वक्षसि प्रीतिसंघम् ।
पादस्थाः षट् च पीडां पुनरपि जलधिर्वामहस्ते च मृत्युं
नेत्रे त्रीणि प्रदद्युः सुखमथ निजभे वाक्पतेः संक्रमर्क्षात् ॥”
इति ज्योतिस्तत्त्वम् ॥

बृ, ञि ञ वृत्याम् । इति कविकल्पद्रुमः ॥ ( क्र्या०-उभ०-सक०-सेट् । ) ञि, ञ, बृणाति बृणीते । बूर्णः । बूर्णिः । इति दुर्गादासः ॥

बे, ऐ ञ स्यूतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-सक०-अनिट् । ) स्यूतिस्तन्तुसन्तानम् । ऐ, ऊयात् । ञ, वयति वयते तन्तुं तन्तुवायः । इति दुर्गादासः ॥

बेकटः, पुं, वैकटिकः । मत्स्यभेदः । भेट्की इति भाषा । युवा । इति मेदिनी ॥ विदूषकः । इति शब्दरत्नावली ॥ तत्र पवर्गीयबकारादौ लिखितः ॥

बेगः, पुं, ( विज + घञ् । ) प्रवाहः । तत्पर्य्यायः ओघः २ वेणी ३ धारा ४ । इति हेमचन्द्रः ॥ जवः । तत्पर्य्यायः । रंहः २ तरः ३ रयः ४ स्यदः ५ । इत्यमरः ॥ ( यथा, मनौ । ५ । १०८ ।
“मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति ।”) महाकालफलम् । इति मेदिनी ॥ रेतः । इति हेमचन्द्रः ॥ मूत्रविष्ठादिनिर्गमप्रवृत्तिः । इति भरतः ॥ संस्कारविशेषः । यथा,—

“सङ्ख्यादयोऽष्टौ वेगाख्यसंस्कारो मरुतो गुणाः ।
अष्टौ सङ्ख्यादयो रूपं द्रवो वेगश्च तेजसः ।
सङ्ख्यादयोऽष्टौ वेगश्च द्रवत्वञ्च गुरुत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्द्दश ॥”
इति भाषापरिच्छेदः ॥ * ॥

( यथा, भागवते । ७ । ८ । २५ ।
“ततोऽभिपद्याभ्यहनन्महासुरो
रुषा नृसिंहं गदयोरुवेगया ॥”)

वेगधारणनिषेधो यथा,—
“वेगरोधो न कर्त्तव्यश्चान्यत्र क्रोधवेगतः ॥”
इति आह्निकतत्त्वधृतविष्णुधर्म्मोत्तरवचनम् ॥
अपि च ।
“स्वभावतः प्रवृत्तानां मलादीनां जिजीविषुः ।
न वेगान्धारयेद्धीरः कामादीनाञ्च धारयेत् ॥”
इति राजवल्लभः ॥